श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६५

*रासक्रीडा-गोपीसमागमनवर्णनम्*

गोपीजनाय कथितं नियमावसाने मारोत्सवं त्वमथ साधयितुं प्रवृत्तः।
सान्द्रेण चान्द्रमहसा शिशिरीकृताशे प्रापूरयो मुरळिकां यमुनावनान्ते॥ १ ॥

सम्मूर्छनाभिरुदितस्वरमण्डलाभिः सम्मूर्छयन्तमखिलं भुवनान्तरालम्।
त्वद्वेणुनादमुपकर्ण्य विभो तरुण्यस्तत्तादृशं कमपि चित्तविमोहमापुः॥ २ ॥

ता गेहकृत्यनिरतास्तनयप्रसक्ताः कान्तोपसेवनपराश्च सरोरुहाक्ष्यः।
सर्वं विसृज्य मुरळीरवमोहितास्ते कान्तारदेशमयि कान्ततनो समेताः॥ ३ ॥

काश्चिन्निजाङ्गपरिभूषणमादधाना
  वेणुप्रणादमुपकर्ण्य कृतार्धभूषाः।
त्वामागता ननु तथैव विभूषिताभ्य-
  स्ता एव संरुरुचिरे तव लोचनाय॥ ४ ॥

हारं नितम्बभुवि काचन धारयन्ती
  काञ्चीं च कण्ठभुवि देव समागता त्वाम्।
हारित्वमात्मजघनस्य मुकुन्द तुभ्यं
  व्यक्तं बभाष इव मुग्धमुखी विशेषात्॥ ५ ॥

काचित् कुचे पुनरसज्जितकञ्चुळीका
  व्यामोहतः परवधूभिरलक्ष्यमाणा।
त्वामाययौ निरुपमप्रणयातिभार-
  राज्याभिषेकविधये कलशीधरेव॥ ६ ॥

काश्चित् गृहात् किल निरेतुमपारयन्त्य-
    स्त्वामेव देव हृदये सुदृढं विभाव्य।
देहं विधूय परचित्सुखरूपमेकं
    त्वामाविशन् परमिमा ननु धन्यधन्याः॥ ७ ॥

जारात्मना न परमात्मतया स्मरन्त्यो नार्यो गताः परमहंसगतिं क्षणेन।
तं त्वां प्रकाशपरमात्मतनुं कथञ्चिच्चित्ते वहन्नमृतमश्रममश्नुवीय॥ ८ ॥

अभ्यागताभिरभितो व्रजसुन्दरीभि-
    र्मुग्धस्मितार्द्रवदनः करुणावलोकी।
निस्सीमकान्तिजलधिस्त्वमवेक्ष्यमाणो
    विश्वैकहृद्य हर मे पवनेश रोगान्॥ ९ ॥

**********